Shloka

(in devanagari)

(in English)

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ३.४० ॥

indriyāṇi manō buddhirasyādhiṣṭhānamucyatē |
ētairvimōhayatyēṣa jñānamāvṛtya dēhinam || 3.40 ||

Index Ref 3rd chapter,40 of 43

पदच्छेदः इन्द्रियाणि,मनः,बुद्धिश्च,अस्य,अधिष्ठानम्,उच्यते ।
एतैः,विमोहयति,एषः,ज्ञानम्,आवृत्य,देहिनम् ॥

अन्वयार्थः (Prose order with meaning & introduction to the word)

इन्द्रियाणि	नेत्रादीनि	Senses
मनः	चित्तम्	mind
बुद्धिश्च	धीः च	intellect
अस्य	एतस्य कामस्य	its
अधिष्ठानम्	आश्रयः	abode
उच्यते	कथ्यते	is said
एषः	एषः कामः	this
एतैः	एभिः	by these
ज्ञानम्	ज्ञानम्	knowledge
आवृत्य	आच्छाद्य	covering
देहिनम्	शरीरिणम्	the embodied
विमोहयति	विविधं मोहयति	deludes

अर्थः इन्द्रियाणि, मनः, बुद्धिश्च अस्य अधिष्ठानम् उच्यते । एषः (कामः) एतैः ज्ञानम् आवृत्य देहिनम् विमोहयति ।

Meaning The senses, the mind, and the intellect are said to be its abode: through these it deludes the embodied by veiling his wisdom.

तात्पर्यं पञ्चेन्द्रियाणि, मनः,बुद्धिः च कामस्य आश्रयाः सन्ति । एषः कामः एभिः पञ्चभिः इन्द्रियैः ज्ञानम् आच्छाद्य शरीरिणं विमोहयति ।

व्याकरणम्

सन्धिः

मनो बुद्धिः	- मनः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः
बुद्धिरस्य	- बुद्धिः + अस्य	विसर्गसन्धिः (रेफः)
विमोहयत्येषः	- विमोहयति + एषः	यण् सन्धिः
एतैर्विमोहयति	- एतैः + विमोहयति	विसर्गसन्धिः (रेफः)

कृदन्तः

अधिष्ठानम्	- अधि + स्था + ल्युट् (अधिकरणे)
आवृत्य	- आङ् + वृतु + ल्यप् ।